# 93 - त्रिनवतितम दशकम्
# गुरु शिक्षा वर्णनम्

बंधु स्नेहं विजह्यां तव हि करुणया त्वय्युपावेशितात्मा
सर्वं त्यक्त्वा चरेयं सकलमपि जगद् वीक्ष्य माया विलासम् ।
नानात्वाद् भ्रान्ति जन्यात् सति खलु गुण दोषाव बोधे विधिर्वा
व्यासेधो वा कथं तौ त्वयि निहित मतेर् वीत वैषम्य बुद्धेः॥ ॥93-1॥

क्षुत् तृष्णा लोप मात्रे सतत कृतधियो जंतवस् संत्यनंता:
तेभ्यो विज्ञान वत्त्वात् पुरुष इह वरस् तज्जनिर् दुर्लभैव ।
तत्राप्यात्मात्मनस् स्यात् सुहृदपि च रिपुर् यत्वयि न्यस्त चेता:
तापोच्छित्ते रुपायं स्मरति स हि सुहृत् स्वात्म वैरी ततोऽन्यः॥93-2॥

त्वत् कारुण्ये प्रवृत्ते क इव नहि गुरु: लोकवृत्तेऽपि भूमन्
सर्वा क्रांतापि भूमि: नहि चलति तत: सत्क्षमां शिक्षयेयम् ।
गृह्णीया मीश तत्तत् विषय परिचयेऽपि अप्रसक्तिं समीरात्
व्याप्त त्वं चात्मनो मे गगन गुरु वशात् भातु निर्लेपता च ॥ ॥93-3॥

स्वच्छस् स्यां पावनोऽहं मधुर उदक वत् वह्नि वन् मास्म गृह्णां
सर्वान् नीनोऽपि दोषं तरुषु तमिव मां सर्व भूतेष्ववेयाम् ।
पुष्टिर् नष्टि: कलानां शशिन इव तनो: नात्मनोऽस्तीति विद्यां
तोयादि व्यस्त मार्तांडवत् अपि च तनुष् वेकतां त्वत् प्रसादात् ॥ ॥93-4॥

स्नेहाद् व्याधात्त पुत्र प्रणय मृत कपोतायितो मा स्म भूवं
प्राप्तं प्राश्नन् सहेय क्षुध मपि शयुवत् सिंधुवत् स्यामगाधः ।
मा पप्तं योषिदादौ शिखिनि शल भवत् भृंग वत् सार भागी
भूयासं किंतु तद्वद् धन चयन वशान् माह मीश प्रणेशम् ॥ ॥93-5॥

मा बद्ध्यासं तरुण्या गज इव वशया नार्जयेयं धनौघं
हर्तान्यस् तं हि माध्वी हर इव मृग वन्मा मुहं ग्राम्य गीतैः ।
नात्यासज्जेय भोज्ये झष इव बलिशे पिंगला वन् निराशः
सुप्यां भर्तव्य योगात् कुरर इव विभो सामिषोऽन्यैर् न हन्यै ॥॥93-6॥

वर्तेय त्यक्त मानः सुख मति शिशुवत् निस्सहायश् चरेयं
कन्याया एक शेषो वलय इव विभो वर्जितान्योन्य घोषः ।
त्व च्चित्तो नाव बुध्यै परम् इषु कृदिव क्ष्माभृदायान घोषं
गेहेष्वन्य प्रणीतेषु अहिरिव निवसानि उन्दुरोर् मंदिरेषु ॥ ॥93-7॥

त्वय्येव त्वत्कृतं त्वं क्षपयसि जगदिति ऊर्णनाभात् प्रतीयां
त्वच्चिंता त्वत् स्वरूपं कुरुत इति दृढं शिक्षये पेशकारात् ।
विड्भस्मात्मा च देहो भवति गुरुवरो यो विवेकं विरक्तिं
धत्ते संचिंत्यमानो मम तु बहुरुजा पीडितोऽयं विशेषात् ॥ ॥93-8॥

ही ही मे देह मोहं त्यज पवन पुराधीश यत् प्रेम हेतो:
गेहे वित्ते कलत्रा दिषु च विवशिता: त्वत् पदं विस्मरंति ।
सोऽयं वह्नेश् शुनो वा परमिह परतः सांप्रतं चाक्षिकर्ण
त्वग् जिह्वाद्या विकर्षं त्यवश मत इतः कोऽपि न त्वत्पदाब्जे ॥93-9॥

दुर्वारो देह मोहो यदि पुन रधुना तर्हि निश्शेष रोगान्
हृत्वा भक्तिं द्रढिष्ठां कुरु तव पद पंकेरुहे पंकजाक्ष ।
नूनं नाना भवांते समधिगत मिमं मुक्तिदं विप्र देहं
क्षुद्रे हा हंत मा मा क्षिप विषय रसे पाहि मां मारुतेश ॥ ॥93-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥